## नौ वृ धान्ये। (४८/३२२३)

वृ इति वृङ्वृञोः सामान्येन ग्रहणम्। निशब्दे उपपदे वृ इत्येतस्माद् धातोः धान्यविशेषेऽभिधेये घञ् प्रत्ययो भवति। अपोऽपवादः। नीवारा नाम व्रीहयो [1]भवन्ति। धान्ये इति किम्? निवरा कन्या॥

## उदि श्रयतियौतिपूद्रुवः। (४९/३२२४)

उच्छब्दे उपपदे श्रयत्यादिभ्यो[2] घञ् प्रत्ययो भवति। अजपोरपवादः। उच्छ्रायः। उद्यावः। उत्पावः। उद्द्रावः। कथं पतनान्ताः समुच्छ्रयाः? वक्ष्यमाणं विभाषाग्रहणमिह[3] [4]सिंहावलोकितन्यायेन सम्बध्यते॥

## विभाषाऽऽङि रुप्लुवोः। (५०/३२२५)

[5]आङि उपपदे रौतेः प्लवतेश्च[6] विभाषा घञ् प्रत्ययो भवति। आरावः, आरवः। आप्लावः, आप्लवः॥

## अवे ग्रहो वर्षप्रतिबन्धे। (५१/३२२६)

विभाषा इति वर्तते। [7]अवे उपपदे ग्रहेः धातोः घञ् प्रत्ययो भवति विभाषा वर्षप्रतिबन्धेऽभिधेये[8]। प्राप्तकालस्य वर्षस्य कुतश्चिन् निमित्तादभावो वर्षप्रतिबन्धः। अवग्राहो [9]देवस्य, अवग्रहो देवस्य। वर्षप्रतिबन्धे इति किम्? अवग्रहः पदस्य॥

## प्रे वणिजाम्। (५२/३२२७)

ग्रहः इति वर्तते। विभाषा इत्येव। प्रशब्दे उपपदे ग्रहेर्धातोः विभाषा घञ् प्रत्ययो भवति, प्रत्ययान्तवाच्यश्चेद् वणिजां [10]सम्बन्धी भवति। वणिक्सम्बन्धेन च तुलासूत्रं [11]लक्ष्यते, न तु वणिजस्तन्त्रम्। तुला [12]प्रगृह्यते येन सूत्रेण स शब्दार्थः। तुलाप्रग्राहेण चरति, तुलाप्रग्रहेण चरति वणिगन्यो वा। वणिजाम् इति किम्? प्रग्रहो देवदत्तस्य॥

## रश्मौ च। (५३/३२२८)

ग्रहः विभाषा प्रे इति वर्तते। प्रशब्दे उपपदे [13]ग्रहेर्धातोः विभाषा घञ् प्रत्ययो भवति, [14]रश्मिश्चेत् प्रत्ययान्तेनाभिधीयते। रथादियुक्तानामश्वादीनां [15]संयमनार्था रज्जू रश्मिरिह गृह्यते। प्रग्राहः, प्रग्रहः॥

---

1. भवन्ति नास्ति क. इ. 2. धातुभ्यः इत्यधिकम् ब. ड. फ. 3. इह नास्ति फ. 4. सिंहावलोकनन्यायेन ब. 5. आङउपपदे फ. 6. धात्वोः इत्यधिकम् ब. फ. 7. अवशब्दे फ. 8. अपोऽपवादः इत्यधिकम् अ. ब. इ. क. ड. 9. देवदत्तस्य अ. फ. 10. सम्बन्धि ह, सम्बन्धो ग. फ. इ. 11. गृह्यते फ. 12. प्रगृह्यते नास्ति इ. 13. धातोः नास्ति फ. 14. रश्मौ फ. 15. या रज्जुः सा फ. ह.